# Shrikrishna Dattavarashtakam

# શ્રીકૃષ્ણદત્તવરાષ્ટકમ્

## Document Information

Text title : Shrikrishna Dattavara Ashtakam

File name : shrIkRRiShNadattavarAShTakam.itx

Category : vishhnu, krishna, aShTaka

Location : doc_vishhnu

Proofread by : Saritha Sangameswaran

Description/comments : vairAgyabhAskaraH shlokasangraha by gopAladAsa

Latest update : November 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 12, 2021

*sanskritdocuments.org*

# શ્રીકૃષ્ણદત્તવરાષ્ટકમ્

મુનીન્દ્રાણાં ચેતીવિષયમમલં કઞ્જનયનં
    દયાસિન્ધું શૌરિં સ્વમનસિ નિધાયામરતરુમ્ ।
વદામ્યાદૌ બુદ્ધેરભિલષિતમેનં મપુધુરી-
    નિવાસી કૃષ્ણાખ્યા રુચિદમિહ નામૈકશરણઃ ॥ ૧॥

શ્રીનન્દાત્મજ ભક્તવત્સલ હરે મે પ્રાર્થનાં ત્વં શ‍ૃણુ
    બ્રહ્માણ્ડાનિ મુખાનિ મે પ્રતિદિનં યાવન્તિ લોમેષુ તે ।
હે કૃષ્ણેતિ વદન્તુ તાઃ પ્રતિમુખં તાવન્તિ જિહ્વાં મમ
    સ્યુર્મે દાનમિદં હિ દેહિ સ તદા કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૨॥

અન્યાં તાં શ‍ૃણુ કીર્તિવજ્જનગતે શ્રુત્વા ચ પૂર્ણં કુરુ
    ભક્તાનાં ત્વયિ યાવતી તવ વિભો ત્રૈકાલિકાનાં રુચિઃ ।
નામ્નો વૈ યુવયોઃ સદા ભવતુ મે ગાને રુચિસ્તાવતી
    ત્વત્તોઽન્યત્ર મનઃ પ્રયાતુ ન તદા કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૩॥

નીરૌઘાઃ પ્રલયે યથા યદુપતે વર્ધન્તિ કૃષ્ણામિતાઃ
    પ્રીતિર્વર્ધ્તુ મે મુકુન્દ ભવતઃ શ્રીશાભિધાને તથા ।
ઉત્સાહો હૃદિ નામતે યદિ ભવેદ્વાયં તુ રોમાણિ મે
    માર્ગે ચાસનગો જપાન્યહરહઃ કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૪॥

અન્યાઽમેસ્ત્યાભિશસ્ત્રિકા ચ ભગવન્ પ્રાણે ગતે કાયતઃ (અન્યાઽમેસ્ત્યાભિપ્રાર્થના)
    કૃષ્ણેતિ તિ પ્રસભં ત્વતીવ જપતુ પ્રાણૈર્વિહિનાસ્તનુઃ ।
ભિન્ના લોમગણાઃ કદાચિદપિ તે કાયન્તુ કૃષ્ણં શવા (ગાયન્તુ કૃષ્ણં)
    બ્રહ્માણ્ડેષુ ગતાશ્ચ યેષુ સહ તૈઃ કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૫॥

હે ગોવિન્દ મમાભિલાષકમિમં દેવપ્રભો પૂરય
    સ્થાસ્નૂનાં ભુવનેષુ સન્તિ વિજને યાવન્તિ બીજાનિ ચ ।
અન્નાદે પ્રતિ તે જપાનિ કવલં તાવન્તિ નામાન્યહં
    ગચ્છામ્યધ્વનિ યત્ર સાધ્વગનૃભિઃ કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૬॥

યાચ્ઞા મેઽસ્તિ તથૈવ નિર્જરપતે દામોદરાધોક્ષજ
યત્રાહં ચ યદા સ્વપાનિ વરદ ત્વં તત્ર મેઽર્થં જપ ।
શ્રીરાધા ત્વયિ તજ્જપેચ્છ્રમયુતે માતેવ હૃદ્યઙ્કુરી
મેઽખણ્ડઃ સુજપો ભવેદિતિ તદા કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૭॥

અન્યાં કૃષ્ણ શ‍ૃણુષ્વ દુર્ઘટકરીં માયાપતે મેઽર્થનામ્
તે નામાનિ જપેયમેવ ભુવને યાવન્તિ ભાનિ ક્ષણે । (ભાનિ એવં નક્ષત્રાણિ)
તે નામસ્મરણં કૃતં સુમતિભિર્યાવત્કરિષ્યન્તિ યે
પ્રત્યુચ્છ્વાસમથો સ્મરાનિ તદહં કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૮॥

વિષ્વક્સેન વિધો શ‍ૃણુષ્વ ચરમં શૌરે ગુરો લાલસં (વિષ્વક્સેન હરે)
કાઙ્ક્ષેઘસ્તવ નામ વારિધિઝષસ્ત્રૈલોક્યમોક્ષં યદા ।
કાર્યં નૈવ વિલમ્બનં ચ ભવતા તસ્માદ્બહૂંસ્તારય
તસ્યાન્તે સહ રાધયા નિવસતાત્ કૃષ્ણસ્તથાઽસ્તૂક્તવાન્ ॥ ૯॥

ઇતિ શ્રીમદુદાસીનપરમહંસજ્ઞાનદાસાખ્યેન વિરચિતં
શ્રીકૃષ્ણદત્તવરાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Saritha Sangameswaran

*Shrikrishna Dattavarashtakam*

pdf was typeset on November 12, 2021

Please send corrections to *sanskrit@cheerful.com*